[A-33]
[A-33]

SEAT No.________

No. of Printed Pages: 02

# Sardar Patel University

**M. A. (Previous) (External) Examination Sanskrit (New)**

**Thursday Date: 04/04/2019** **Time: 10.00 A.M. to 01.00 P.M.**

**MAPESAN401: Indian Philosophy:** Shankarabhashya of Shankaracharya (Adhyaya-I Selected Sutras), (Adhyaya-II Omit Bauddha Kahandana) & Jain-Bauddha Darshana (of Sarvadarshansangraha)

**Total Marks: 100**

પ્રશ્ન: ૧ ગમે તે બે ગદ્યખંડ સાનુવાદ સમજાવો: (१४)

१. अस्येति प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमा निर्देश:। षष्ठी जन्मादिधर्मसंबन्धार्था। यत इति कारणनिर्देश:। अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्त-क्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यत: सर्वज्ञात्मसर्वशक्ते: कारणाद्भवति तद्ब्रह्मेति वाक्यशेष:। अन्येषामपि भावविकाराणां त्रष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम्। यास्कपरिपठितानां तु जायतेऽस्ति इत्यादीनां ग्रहणे तेषां जगत: स्थितिकाले संभाव्यमानत्वान्मूलकारणादु-त्पत्तिस्थितिनाशा जगतो न गृहीता: स्युरित्याशङ्क्येत, तन्मा शङ्कीति योत्पत्तिर्ब्रह्मणस्तत्रैव स्थिति: प्रलयश्च गृह्यन्ते।

२. तत इदमुच्यते- परमात्मैवेह भूमा भवितुमर्हति न प्राण:। कस्मात्। संप्रसादादध्युपदेशात्। संप्रसाद इति सुषुप्तं स्थानमुच्यते, सम्यक्प्रसीदत्यस्मिन्निति निर्वचनात्। बृहदारण्यके च स्वप्नजागरितस्थानाभ्यां सह पाठात् तस्यां च संप्रसादावस्थायां प्राणो जागर्तीति प्राणोऽत्र संप्रसादोऽभिप्रेयते। प्राणादूर्ध्वं भूम्र उपदिश्यमानत्वादित्यर्थ:। प्राण एव चेद्भूमा स्यात्स एव तस्मादूर्ध्वमुपदिष्टम्। किं तर्हि नाम्नोऽन्यदर्थान्तरमु-पदिष्टं वागाख्यम् वाग्वाव नाम्नो भूयसी इति। तथा वागादिभ्योऽप्या प्राणादर्थान्तरमेव तत्र तत्रोर्ध्वमुपदिष्टम्। तद्वत्प्राणादूर्ध्वमुपदिश्यमानो भूमा प्राणादर्थान्तरभूतो भवितुमर्हति।

३. प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ कल्पितानि महदादीनि न तानि वेदे लोके चोपलभ्यन्ते। भूतेन्द्रियाणि तावल्लोकवेदप्रसिद्धत्वाच्छक्यन्ते स्मर्तुम्। अलोकवेदप्रसिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते। यदपि क्वचित्तत्परमिव श्रवणमवभासते तदप्यतत्परं व्याख्यातम् आनुमानिकमप्येकेषाम् इत्यत्र। कार्यस्मृतेरप्रामाण्यात्कारणस्मृतेरप्यप्रामाण्यं युक्तमित्यभिप्राय:। तस्मादपि न स्मृत्यनवकाशप्रसङ्गो दोष:। तर्कावष्टम्भं तु न विलक्षणत्वात् इत्यारभ्योन्मथिष्यति।

४. तत्र इदमभिधीयते- विभागावस्थानां तावदणूनां संयोग: कर्मापेक्षोऽभ्युपगन्तव्य:, कर्मवतां तन्त्वादीनां संयोगदर्शनात्। कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यम्। अनभ्युपगमे निमित्ताभावान्नाणुष्वाद्यं कर्म स्यात्। अभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा । अथ अदृष्टं किमपि कर्मण: निमित्तम् अभ्यपगम्येत, तस्य असंभवात् न एव अणुषु आद्यं कर्म स्यात्। न हि तस्याम् अवस्थायाम् आत्मगुण: प्रयत्न: संभवति, शरीरा-भावात्। शरीरप्रतिष्ठे हि मनसि आत्मन: सति, आत्मगुण: प्रयत्नो जयते। एतेन अभिघातादि अपि अदृष्टं निमित्तं प्रत्याख्यातव्यम्। सर्गोत्तरकालं हि तत् सर्वम्, न आद्यस्य कर्मण: निमित्तं संभवति।

પ્રશ્ન: ૨ ગમે તે બે સૂત્રો સમજાવો: (१०)

१. शास्त्रयोनित्वात्। १/१/३

२. स्मर्यमाणमनुमानं स्यादिति। १/२/२५

३. एतेन योग: प्रत्युक्त: ।२/१/३

४. सम्बन्धानुपपत्तेश्च। २/२/३८



(P.T.O.)

પ્રશ્ન: ૩ આનન્દમયાધિકરણનો સાર આપો (૨૦)

અથવા

પ્રશ્ન: ૩ સાંખ્યમતનું શંકરે કરેલું ખંડન ચર્ચો (૨૦)

પ્રશ્ન: ૪ શંકરના મતે બ્રહ્મનું સ્વરૂપ સમજાવો (૧૬)

અથવા

પ્રશ્ન: ૪ બ્રહ્મસૂત્રના ભાષ્યકારો વિશે સવિસ્તર નોંધ લખો (૧૬)

પ્રશ્ન: ૫ ચાર આર્યસત્યો વિશે સવિસ્તર નોંધ લખો (૨૦)

અથવા

પ્રશ્ન: ૫ ક્ષણિકવાદ વિશે સવિસ્તર નોંધ લખો (૨૦)

પ્રશ્ન: ૬ સ્યાદ્‌વાદ્‌ વિશે સવિસ્તર નોંધ લખો (૨૦)

અથવા

પ્રશ્ન: ૬ જૈનોના મતે જ્ઞાનના સ્વરૂપ વિશે ચર્ચા-વિચારણા કરો (૨૦)

(2)